याज्ञवल्क्यः ।
"आगमो ह्यधिको भोगाद्विना पूर्व्वक्रमागतात् ।
आगमः कारणं तत्र भुक्तिः स्तोकापि यत्र नो ॥
आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥"
भूम्यादावागमः पूर्व्वपुरुषक्रमादागतभोगाद्बलवान् । अतः क्रमागतभोग आगमाद्बलवान् । तथा च वृहस्पतिः,—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अव्याहता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
त्रिपुरुषभोगमाह व्यासः,—
"प्रपितामहेन यद्भुक्तं तत्पुत्त्रेण विना च तम् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः ॥"
आगमोऽपि बलवान्न भवति यत्र स्तोकापि भुक्तिर्नास्ति । तथा च नारदः ।
"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु ।
विशेषतः स्थावराणां यन्न भुक्तं न तत् स्थिरम् ॥"
इति दीपकलिका ॥
यत्र वादिन्यौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो न निश्चीयते तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थ इति मिताक्षरा ॥ अर्थात् यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र ।
"सर्व्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा ॥"
इति याज्ञवल्क्यवचनान्निर्णयः ॥
आगमस्त्विति आ सम्यग्गम्यते प्राप्यते स्वं भवति येन क्रयादिना स आगम इति व्यवहारमातृका ॥ आगमः साक्षिपत्रादिकमिति याज्ञवल्क्यदीपकलिका ॥ आगमो धनोपार्ज्जनोपायः क्रयादिरिति मैथिलाः ॥ तत्रान्येनाभियुक्त आगमकर्त्ता तदुद्धृतमुद्धरेत्तत्पुत्त्रपौत्रौ नागमसुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम् । विशेषयति वृहस्पतिः ।
"आहर्त्ता शोधयेद्भुक्तिमागमञ्चापि संसदि ।
तत्सुतो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥"
इति मूलपाणिधृतम् ॥
तत्पुत्त्रादौ न किञ्चनेति मैथिलधृतम् ॥ आहर्त्ता अर्ज्जनकर्त्ता । अत्र पुत्त्रस्य भुक्तिशोधनमात्रम् । भुक्तिशोधनमाहतुर्व्यासकात्यायनौ ।
"आगमो दीर्घकालश्च निश्छिद्रोऽन्यरवोज्झितः ।
प्रत्यर्थिसन्निधानञ्च पञ्चाङ्गो भोग इष्यते ॥"
प्रमाणमिति शेषः । आगमः क्रयादियुक्तः । एष च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः । योऽभियुक्त इति यो भोगे क्रियमाणे परेणाभियुक्तः परेतो मृतः स्यात्तागमसुद्धृतवान् तदा तत्पुत्त्रादिरेव तमुद्धरेत् । तथाह नारदः ।
"अथारूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्त्रेण सोऽर्थः संशोध्यो न तु भोगो निवर्त्तयेत् ॥
भोगः केवलभोगः । तथा च स एव । आदौ तु कारणं दानं पश्चाद्भुक्तिस्तु सागमेति । एष स विवादभोगः षष्ट्यब्देतरपरः । तथाविधभोगस्यागमं विनापि प्रामाण्यात् । तथा च व्यासः ।
"वर्षाणि विंशतिं भुक्ता स्वामिनाव्याहता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु द्विपौरुषी ॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः ॥"
एतद्वचनमसमक्षभोगविषयकमिति समक्षविंशतिवर्षभोगविषयकवचनेनाविरुद्धम् । एतादृक्स्थलयुक्तकाह एव कात्यायनः ।
"स्मार्त्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्त्ते त्वागमाभावात् क्रमात्त्रिपुरुषागता ॥"
षष्टिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिव्यपदेशस्य फलमाह न तत्रेत्यादि । अतएव नारदः ।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम् ॥"
अन्यायेनेत्यत्रानागममिति शूलपाणिधृतपाठः । तुरप्यर्थः । पित्रा सह पितरमादाय त्रिभिरित्यर्थः । यत्तु ।
"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत् पृथिवीपतिः ॥"
इति दण्डविधायकव्यासवचनं तद्धर्म्मशास्त्रविरोधात् न मुख्यार्थपरम् । तदाह स एव ।
"यत्र विप्रतिपत्तिः स्याद्धर्म्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रार्थमुत्सृज्य धर्म्मशास्त्रार्थमाचरेत् ॥"
एवमेव शूलपाणिः । वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधननरेन्द्रधनपरम् ।
"स्त्रीधनञ्च नरेन्द्राणां न कदाचन जीर्य्यति ।
अनागमं भुज्यमानमपि वर्षशतैरपि ॥"
इति स्वत्वनिषेधकनारदवचनैकवाक्यत्वात् । यत्र विप्रतिपत्तिः स्यादिति वचनस्याप्येतदुदाहरणम् । यत्रैकस्य जयेऽधर्म्मभागी मित्रलब्धिरपरस्य जयेऽधर्म्मभागी धनलब्धिस्तत्र ।
"हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्ताविति वेदविदां मतम् ॥"
इति याज्ञवल्क्योक्तार्थशास्त्रमुत्सृज्य क्रोधलोभविवर्ज्जित इति धर्म्मशास्त्रमवलम्ब्य व्यवहारं पश्येत् । अतएव ।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ॥"
इति कात्यायनोक्तमिति । भवदेवस्तु व्यासवचनन्तु प्रतिवादिनोऽसन्निधाने पुरुषैकत्रयभोगाभिप्रायं त्रैपुरुषिकभोगस्य तत्रापि प्रमाणत्वादित्याहुः ॥

अथ भुक्तिस्वत्वापवादः ।

तत्र वृहस्पतिः ।
"भुक्तिस्त्रैपुरुषी सिद्ध्येदपरेषां न संशयः ।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
अस्वामिना च यद्भुक्तं गृहक्षेत्रापणादिकम् ॥
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते ॥
विवाह्य श्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च ।
सुदीर्घेणापि कालेन तेषां तत्तु न सिद्ध्यति ॥"
आपणो विक्रयस्थानम् । विवाह्यो जामाता । इति च व्यवहारतत्त्वम् ॥

भुक्तिप्रदः, पुं, (भुक्तिं भोगं प्रददातीति । प्र + दा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) मुद्गः । इति राजनिर्घण्टः ॥ भोगदातरि, त्रि ॥

भुग्नः, त्रि, (भुज मोटने + क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । रुग्णः २ । इत्यमरः । ३ । १ । ६१ ॥ वक्रः । इति भुजधात्वर्थदर्शनात् । (यथा,—
"साश्रुणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी ।
चक्षुषी पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः ॥"
इति वाभटे निदानस्थाने द्वितीयेऽध्याये ॥
यथा, च भट्टिः । ११ । ८ ।
"पीने भटस्योरसि वीक्ष्य भुग्नां
स्तनांशुकः पाणिरुहान् सुमध्या ॥")

भुज, ओ श औ वक्रणे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) वक्रणमिति वक्रं करोतीति णौ रूपम् । ओ, भुग्नः । श, भुजति लतां वायुः । औ, भोक्ता । इति दुर्गादासः ॥

भुज, ध औ पाले । भक्षे । इति कविकल्पद्रुमः ॥ (रुधा०-पर०-सक०-अनिट् ।) ध, भुनक्ति । औ, अभौक्षीत् । पालनं पालनम् उपभोगश्च तस्मात् पालने परस्मैपदम् । इति बोध्यम् । भुनक्ति पृथिवीं राजा पालयतीत्यर्थः । उपभोगे तु दुःखी जनो दुःखशतानि भुङ्क्ते इति । दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः । एवं सुखमुपभुङ्क्ते इत्यादि च बोध्यम् । भुजोऽशने इत्यत्र भक्षणमात्रस्य ग्रहणेऽपि उपभोगस्य भक्षणजन्यतृप्तिजनकत्वविवक्षया सिद्धिरिति विद्यानिवासः । इति दुर्गादासः ॥

भुजः, पुं स्त्री, (भुजति वक्रो भवतीति । भुज + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । यद्वा, भुज्यतेऽनेनेति । भुज + "हलश्चेति ।" ३ । ३ । १२१ । इति घञ् । इत्यत्र काशिकोक्तेः घञ् । "भुजन्युब्जौ पाण्युपतापयोः ।" ७ । ३ । ६१ । इति घञि गुणाभावः कुत्वाभावश्च निपात्यते ।) तत्पर्य्यायः । बाहुः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० ॥ बाहः ५ बाहा ६ भुजा ७ दोषः ८ दोषा ९ । इत्यमरटीकायां भरतः ॥ करः १० । इति मेदिनी । जे, १३ ॥ (यथा, रघुः । २ । ७४ ।
"भुजे भुजङ्गेन्द्रसमानसारे
भूयः स भूमेर्धुरमाससञ्ज ॥")
तस्य शुभाशुभलक्षणम् यथा,—
"कक्षा चाल्पदला श्रेष्ठा सुगन्धिसूक्ष्मरोमिका ।
अन्यथा अर्थहीनानामसौ निःस्वस्य रोमशौ ॥
निर्म्मांसौ चैव सुभाष्यौ स्थिरौ च विपुलौ भुजौ ।